शूद्रमात्रस्य दौहित्रो दत्तको भवति । यथा,—
"दौहित्रो भागिनेयश्च शूद्रैस्तु क्रियते सुतः ।
ब्राह्मणादित्रये नास्ति भागिनेयसुतः क्वचित् ॥"
इति दत्तकमीमांसाधृतशौनकवचनम् ॥
तस्य मातामहधनाधिकारित्वम् । यथा,—
"दुहितृभावे दौहित्रः ।
'पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥'
इति मनुवचने पौत्रतुल्यत्वाभिधानेन यथा पुत्राभावे पौत्रस्तथा दुहितृभावे दौहित्रः ।
अतएव गोविन्दराजधृतो विष्णुः ।
अपुत्रपौत्रे संसारे दौहित्रा धनमाप्नुयुः ।
पूर्व्वेषां हि स्वधाकारे पौत्रदौहित्रकाः समाः ॥"
इति दायतत्त्वम् ॥
अपि च, सर्व्वदुहितृभावे दौहित्रस्य अधिकारः । दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत् । स एव दद्यात् द्वौ पिण्डौ पित्रे मातामहाय च ॥ इत्यादिवचनात् । अपुत्रस्य इति दुहितृपर्य्यन्ताभावोपलक्षणम् ॥ १ ॥ भ्रातृपौत्रस्याभावे पितुर्दौहित्रस्याधिकारः । धनिपित्रादित्रयपिण्डदातृत्वात् ॥२॥ पितुर्दौहित्राभावे भ्रातृदौहित्रोऽधिकारी । धनिभोग्यपितृपितामहपिण्डदातृत्वात् ॥३॥ पितृव्यपौत्राभावे पितामहदौहित्रस्य अधिकारः धनिभोग्यपितामहप्रपितामहपिण्डदातृत्वात् ॥४॥ पितामहदौहित्रस्याभावे पितृव्यदौहित्रस्याधिकारः । धनिभोग्यतत्पितामहप्रपितामहपिण्डद्वयदातृत्वात् ॥ ५ ॥ तदभावे पितामहभ्राता तदभावे पितामहभ्रातृपुत्रः तदभावे पितामहभ्रातृपौत्रः । तेषां धनिभोग्यतत्प्रपितामहपिण्डदातृत्वात् । ततः प्रपितामहदौहित्रोऽधिकारी । धनिभोग्यप्रपितामहपिण्डदातृत्वात् ॥६॥ प्रपितामहदौहित्राभावे पितामहभ्रातृदौहित्रोऽधिकारी । धनिभोग्यप्रपितामहपिण्डदातृत्वात् ॥७॥ पितामहभ्रातृदौहित्राभावे मातामहः । तदभावे मातुलः । तदभावे मातुलपुत्रः । तदभावे मातुलपौत्रः । तदभावे मातामहदौहित्रोऽधिकारी ॥ ८ ॥ मातामहदौहित्राभावे प्रमातामहः । तदभावे प्रमातामहपुत्रः । तदभावे प्रमातामहपौत्रः । तदभावे प्रमातामहप्रपौत्रः । तदभावे प्रमातामहदौहित्रोऽधिकारी ॥ ९ ॥ प्रमातामहदौहित्राभावे वृद्धप्रमातामहोऽधिकारी । तदभावे वृद्धप्रमातामहपुत्रः । तदभावे वृद्धप्रमातामहपौत्रः । तदभावे वृद्धप्रमातामहप्रपौत्रः । तदभावे वृद्धप्रमातामहदौहित्रोऽधिकारी ॥१०॥ स्त्रीधने तु पुत्राभावे दौहित्रोऽधिकारी । पुत्राधिकारात् प्राक् दुहित्रधिकारश्रुतेः । तदधिकाया दुहितुः पुत्रेण बाध्यपुत्रबाधस्यैवन्याय्यत्वात् ॥११॥ इति श्रीकृष्णतर्कालङ्कारकृतदायक्रमसंग्रहः ॥ श्राद्धे दौहित्रभोजनप्राशस्त्यम् । यथा,—
"व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत् ।
कुतपञ्चासने दद्यात्तिलैश्च विकिरेन्महीम् ॥"
इति मानवे । ३ । २३४ ॥

द्यावाक्षमे, स्त्री, (द्यौश्च क्षमा च । "दिवो द्यावा ।" ६ । ३ । २९ । इति द्यावादेशः ।) स्वर्गपृथिव्यौ । इति हेमचन्द्रः । ४ । ४ ॥ द्विवचनान्तोऽयम् ॥

द्यावापृथिव्यौ, स्त्री, (द्यौश्च पृथिवी च । "दिवसश्च पृथिव्याम् ।" ६ ।३। ३० । इति चात् दिवो द्यावा ।) स्वर्गपृथ्व्यौ । इति हेमचन्द्रः ।४।४॥ (यथा, मनुः । ३ । ८६ ।
"कुह्वै चैवानुमत्यै च प्रजापतय एव च ।
सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः ॥")
तद्वैदिकपर्य्यायः । अधी १ पुरन्धी २ धिषणे ३ रोदसी ४ चोणी ५ अम्भसी ६ नभसी ७ रजसी ८ सदसी ९ सद्मनी १० घृतवती ११ बहुले १२ गभीरे १३ गम्भीरे १४ ओमण्यौ १५ चम्वौ १६ पार्थ्वौ १७ मही १८ उर्व्वी १९ पृथ्वी २० अदिती २१ अह्नी २२ दूरे २३ अन्ते २४ अपारे २५ अरे २६ पारे २७ । इति सप्तविंशतिर्द्यावापृथिव्योर्नामधेयानि । इति वैदिकनिघण्टौ ३ अः ।

द्यावाभूमी, स्त्री, (द्यौश्च भूमिश्च । "दिवो द्यावा ।" ६ । ३ । २९ । इति द्यावादेशः ।) स्वर्गपृथिव्यौ । इति हेमचन्द्रः । ४ । ४ ॥ (यथा, ऋग्वेदे । ४ । ५५ । १ ।
"को वस्त्राता वसवः को वरूता
द्यावाभूमी अदिते त्रासीथां नः ॥")

द्यु, ल अभिसर्पणे । इति कविकल्पद्रुमः ॥ (अदां-परं-सकं-अनिट् ।) अभिसर्पणं आभिमुख्येन गमनम् । ल, द्यौति सिंहो म्टगानिव । इति दुर्गादासः ॥

द्यु, क्ली, (द्योतीति । द्यु+क्विप् ।) दिनम् । गगणम् । स्वर्गः । इति विश्वः ॥ [ये, २ ॥

द्युः, पुं, (द्यु+क्विप् ।) अग्निः । इति मेदिनी ।

द्युगः, पुं, (द्युनि गगने गच्छतीति । गम+डः ।) पक्षी । इति राजनिर्घण्टः ॥

द्युगणः पुं, (द्यूनां दिनानां गणः ।) अहर्गणः । तस्यानयनमाह ।
"कथितकल्पगतोऽर्कसमा गणा
रविगुणा गतमाससमन्विताः ।
खरहतैर्गुणितस्तिथिसंयुताः
पृथगतोऽधिकमाससमाहतात् ॥
रविदिनाप्तगताधिकमासकैः
कुदिनैः सहितो द्युगणो विधोः ।
पृथगतः पठितावमसंगुणा-
द्विधुदिनाप्तगतावमवर्ज्जितः ॥
भवति भास्करवासरपूर्व्वको
दिनगणो रविमध्यमसावनः ।
अधिकमासदिनक्षयशेषतो
द्युघटकादिकमत्र न गृह्यते ॥"
इति सिद्धान्तशिरोमणिः ॥

द्युत, ऌ ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ऌ, अद्युतत् । ङ, द्योतते दिद्युते । इति दुर्गादासः ॥

द्युत्, पुं, (द्युत दीप्तौ+क्विप् ।) किरणः । इति हेमचन्द्रः । २ । १४ ॥ (द्योतमाने, त्रि । यथा, ऋग्वेदे । १० । ६६ । २ ।
"स हि द्युता विद्युता वेति साम ॥"
द्यु ल अभिसर्पणे+क्विप् तुगागमश्च । अभिगामिनि । यथा, भट्टिः । ५ । ४७ ।
"हरामि रामसौमित्री न्वगौ भूत्वा न्वगद्युतौ ॥")

द्युतिः, स्त्री, (द्योततेऽनयेति । द्युत दीप्तौ+ "इगुपधात् कित् ।" उणां ४ । ११९ । इति इन् स च कित् ।) दीप्तिः । शोभा । इत्यमरः । १ । ३ । १७ ॥ (यथा, भागवते । ८ । ५ । ४२ ।
"लोभोऽधरात् प्रीतिरुपर्य्यभूद्द्युति-
र्नस्तः पशव्यः स्पर्शेन कामः ॥ ;
रश्मिः । इति मेदिनी । ति, २५ ॥ (पुं, चतुर्थस्य मनोः ऋषिविशेषः । यथा, हरिवंशे । ७ । ७५ ।
"चतुर्थस्य तु सावर्ण्णेर्ऋषीन् सप्त निबोध मे ।
द्युतिर्वशिष्ठपुत्रश्च आत्रेयः सुतपास्तथा ॥"
तामसस्य मनोः पुत्त्रविशेषः । यथा, तत्रैव । ७ । २३ ।
"पुत्त्रांश्चैव प्रवक्ष्यामि तामसस्य मनोर्नृपः ।
द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोशनः ॥")

द्युतिकरः, पुं, (करोतीति । कृ+अच् । द्युतेः करः ।) ध्रुवः । इति भूरिप्रयोगः । दीप्तिकारके, त्रि ॥

द्युतितं, त्रि, (द्युत+क्तः । बाहुलकात् न गुणः ।) दीप्तिविशिष्टम् । द्योतितम् । इति मुग्धबोधव्याकरणम् ॥

द्युनं, क्ली, लग्नात् सप्तमराशिः । इति ज्योतिषतत्त्वम् ॥

द्युनिशं, क्ली, (द्यु च निशा च द्वयोः समाहारः ।) अहोरात्रः । इति व्याकरणम् ॥ यथा,—
"भवति किं द्युनिशं द्युनिवासिनाम् ।"
इति सिद्धान्तशिरोमणिः ॥

द्युनिवासी, [न्] पुं, (द्युनि स्वर्गे निवसतीति । नि+वस+णिनिः ।) देवता । स्वर्गवासी । इति सिद्धान्तशिरोमणिः ॥

द्युपतिः, पुं, (द्युनो दिनस्य पतिः ।) सूर्य्यः । इति हेमचन्द्रः । २ । ११ ॥ (द्युनो स्वर्गस्य पतिः ।) इन्द्रः ॥

द्युमणिः, पुं, (द्युनो गगनस्य मणिरिव ।) सूर्य्यः । (यथा, भागवते । ८ । १० । ३८ ।
"रेणुदिशः खं द्युमणिञ्च छादयन्
न्यवर्त्ततात्यकसुतिभिः परिप्लुतात् ॥")
अर्कवृक्षः । इत्यमरः ॥ (परिशोधिततान्त्रम् । यथा,—
"विषमहौषधभागमधिकोषणा
द्युमणिरक्तकमार्द्दकमर्द्दितम् ॥
द्युमणिः मारितं ताम्रम् ॥" इति भावप्रकाशस्य मध्यखण्डे १ भागे वातज्वराधिकारे ॥)

द्युमयी, स्त्री, विश्वकर्म्मकन्या । सा सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥